Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्षः १४ अङ्कः १६२
नवेम्बर - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### रुधिरस्य भ्रमणलीला

ईश्वरेण बहूनि द्रव्याणि सृष्टानि । तेषां रुधिरं नितरां विशिष्यते । इतोऽपि रुधिरस्य निर्माणं यन्त्रागारेषु न प्रारब्धम् । प्रयोगशालायां तस्य निरीक्षणं परीक्षणं वा कर्तुं शक्यते, परन्तु सर्जने ईश्वरः एकाधिकारं (Patent) मनुष्येभ्यः न अर्पितवान् । यत्किमपि स्यात्, सामान्यः मनुष्यः अपि रुधिरस्य महत्त्वम् अवगच्छति । तथापि दुर्भाग्येन युद्धकाले तस्य गौरवं धूलिलिप्तं भवति।

सम्बन्धाः नैकविधाः भवन्ति । किन्तु रुधिरस्य सम्बन्धेन मनुष्यः सर्वस्वं समर्पयितुम् उद्यतः भवति । अपरेषु विश्वासं जनयितुम् अपि मनुष्यः रुधिरं संस्मरन् वदति – 'असत्यकथनं मम रक्ते नास्ति ।' नीचस्य रक्तम् अपि नीचम् इति लोके श्रूयते। वस्तुतः रक्तेन मनुष्यस्य परिचयः लोके श्रूयते। वस्तुतः रक्तेन मनुष्यस्य परिचयः भवति। डी.एन.ए. परीक्षणेन बालकस्य प्रच्छन्नः पिता ज्ञायते।

रुधिरं शरीरे अविरतं भ्रमति । तस्य भ्रमणस्य सम्बन्धः अस्माकं मनसि जायमानैः संवेगैः सह वर्तते । अतः एव उद्वेगे भये वा हृदयस्य स्पन्दनं वर्धते। अपि च भिन्नेषु संवेगेषु रक्तस्य भ्रमणलीला अपि भिन्ना भवति। यथा हि मनुष्यः कोपं करोति तदा रुधिरं किं करोति ? तस्मिन् काले रुधिरं हस्तं प्रति प्रवहति। परिणामतः कुपितः मनुष्यः हस्तेन सम्यक् शस्त्रं ग्रहीतुं शक्नोति । यथा युद्धकाले सैनिकानां गुल्मः (दलम्) युक्तेषु स्थानेषु व्यूहं रचयति तथा रुधिरम् अपेक्षितं स्थानं प्रति गतिं करोति।

अस्मासु भयं जायते तदा किं भवति ? तस्मिन् समये रुधिरं पादौ प्रति गतिं करोति । अतः पादयोः शक्तिसञ्चारः भवति । ततः वयं शीघ्रं धावितुं शक्नुमः । भीतस्य मनुष्यस्य मुखं तेजोहीनं दृश्यते । तस्य अपि कारणम् अस्ति। रुधिरं पादयोः साहाय्यं कर्तुं मस्तकात् अधः प्रवहति। तस्मात् तत्र रक्तस्य अपूर्तिः भवति। मुखं च तेजोहीनं भवति।

क्वचित् मनुष्यः कामपि विचित्रां घटनां दृष्ट्वा आश्चर्यचकितः भवति। यथा कश्चित् पिता स्वीयां पुत्रीं चलचित्रगृहे केनापि युवकेन सह कामचेष्टां कुर्वतीं पश्यति। तदा पितुः रुधिरं दृष्टिं प्रति वहति। ततः सः अन्धकारे

( अनुसन्धानम् ३ पृष्ठे... )

# सत्यं सज्जनसङ्गेन दुर्जनः सज्जनायते

आसीद् गङ्गायास्तटे नन्दीपुरं नगरम्। तद् अतीव सुरम्यम्, शीतलं पवित्रञ्च। तत्र वृष्टेरभावेऽपि सर्वे वृक्षाः क्षुपाश्च सदैव हरिताः दृश्यन्ते स्म। तस्मिन् पुरे अवसतां कौचिद् वणिजौ। तयोः एकस्य स्वभावः अतिसाधुः। स भगवत्परायणः, सत्यवादी, मधुरभाषी, कोपरहितः जितेन्द्रियश्च। स मोहननाम्ना विश्रुतः। परन्तु अपरः स्वभावेन दुष्टः असत्यभाषी च। स जनैः सह कदापि मधुरतया न वदति स्म। अस्मात् कारणात् जनाः तं क्रूरः इति अकथयन्। तयोः आपणौ परस्परसन्निधौ एव आस्ताम्। ग्राहकाः क्रूरस्य आपणं नागच्छन्। सर्वे मोहनस्य आपणं गच्छन्ति स्म। इत्थं मोहनस्य आपणं प्रति ग्राहकाणां गमनागमने दृष्ट्वा सोऽतीव खिन्नः अभवत्। सः अचिन्तयत् – 'अस्य एतावती वृद्धिः जायते, मम स्वल्पापि न भवति।' एवं सन्तप्तः स वणिक् मोहनम् अपमानयितुं भृशं प्रायतत, किन्तु सफलो नाभूत्। काले काले स बहून् अपशब्दानपि अभाषत। तथापि मोहनः तं किमपि न भणति स्म। तस्य मनसि कोपः अपि नोदभूत्। स शान्तमनसा भगवन्तं भजति स्म। कतिपय-दिनानन्तरं मोहनम् अपमानयितुं क्रूरेण कश्चिदुपायः चिन्तितः। सः एकं घटं पङ्केन पूरयित्वा आवरणेन आच्छाद्य च मोहनं प्रति अनयत् अवदत् च, "अयि मोहन! अद्याहं स्वग्रामं गमिष्यामि। अहम् एकलः अस्मि। मम पार्श्वे बहुसंभारः वर्तते। अहं तं वोढुमसमर्थः। अद्य ममानुचराः अपि अत्र न सन्ति। अस्मिन् अवसरे भवानेव मम सहायतां कर्तुम् अर्हति। अलं चिन्तया। अहं भवते केवलं स्वर्णपूरितं घटमेव वहनाय दास्यामि, न तु अत्यधिकं भारम्।"

क्रूरस्य एष प्रस्तावः मोहनेन स्वीकृतः। स घटं मस्तकम् आरोप्य क्रूरेण सह अचलत्। मोहनः अग्रगामी आसीत्। तम् अनुगच्छति स्म स क्रूरः। मार्गे इतस्ततः सुन्दराणि अरण्यानि आसन्। सपुष्पाः सपल्लवाश्च वृक्षाः मरुता दोलायन्ते स्म। ग्रीष्मर्तौ प्रचण्डातपेन तयोः वपुः स्वेदेन आर्द्रीभूतम्। इत्थं तौ खगमर्कटादीन् वन्यजीवान् पश्यन्तौ व्रजतः स्म। पथि स क्रूरः अचिन्तयत् – यदि मार्गे कुत्रचित् जनानां समूहः आगच्छेत् तर्हि अहम् एतं घटं त्रोटयिष्यामि। इत्थं चिन्तयन् स मोहनेन सह एति स्म। किञ्चिद् दूरं गत्वा ताभ्यां दृष्टो विशालो जनसमूहः। तम् अवलोक्य क्रूरः अतिप्रसन्नोऽभवत् – 'आ! अधुना मम कार्यं पूर्तिं यास्यति।' यदा मोहनः जनसमूहस्य मध्यम् अयात् तदा पृष्ठतः स क्रूरः हस्ते दण्डमादाय मोहनस्य शिरस्थितं घटम् अत्रोटयत्। सम्पूर्णः कर्दमः मोहनस्य काये अपतत्। तस्य सर्वाणि वस्त्राणि पङ्केन आर्द्राणि। एतद् वीक्ष्य स क्रूरः अहसत्। अन्ये ये जनाः तत्र समूहे आसन् ते सर्वेऽपि तेन सह अहसन्। तान् सर्वान् हसतः दृष्ट्वा मोहनोऽपि प्रसन्नमनसा असहत्। एनं हसन्तं विलोक्य क्रूरः आश्चर्यचकितः अपृच्छत्, "भो मोहन! त्वं कथं हससि? तव तु जनसमूहस्य मध्ये अपमानो जातः।" स उदतरत् – "कथं न? भवन्तः सर्वे अनेन कर्मणा प्रसन्नचित्तेन हसन्ति। भवतः हसतः विलोक्य अहमपि प्रसन्नतया हसामि। अहो धन्यं भाग्यं ममाद्य यदहं भवतः सर्वान् हासितवान्!" एतच्छ्रुत्वा स क्रूरः ग्लान्या तस्य चरणयोः प्रणिपत्य अवदत् – "अहो मया सज्जनं प्रति किं कृतमेतद्?" मोहनेन क्रूरः क्षान्तः। ग्लान्या व्याकुलः स दुर्जनः सज्जनस्य संसर्गेण सज्जनोऽभूत्।

## नार्थो मूर्खजनालये न च सुखम्

सिद्धेश्वरः

सैषा कापि सत्यघटना । विगतशताब्द्याम् उत्कलदेशे, जगन्नाथपुर्याम् आसीत् कश्चिद् भिषग्वरः आचार्यहरिहरनामा । सुविचक्षणबुद्धिः स सत्यवादिविद्यालये आयुर्वेदं पाठयति स्म । परार्थबुद्ध्या च रुग्णान् चिकित्सति स्म निःशुल्कम्।

एकदा कश्चिद् गोपालपुत्रः ज्वरपीडितः अभवत्। गोपाली आचार्यगृहं गत्वा, तं प्रणम्य शोकाकुलनयना अवदत् – 'पुत्रः मे विषमज्वरपीडितः। दिनत्रयं व्यतीतम्। तापः न शाम्यति। उपदिशतु भगवन्! धनव्ययः भवतु नाम, पुत्रः मे स्वस्थः स्यात् अचिरम्।'

आचार्यः धीरप्रशान्तगिरा अभाषत – 'भद्रे! अलं शोकेन। पुत्रस्ते स्वस्थः भविष्यति एव। धनव्ययः नावश्यकः। शृणु मम वचनम् – यथा चन्दनस्य पिष्टं क्रियते तथैव शुण्ठीं गोक्षुरं च पृथक् पिष्ट्वा प्रत्येकपिष्टस्य अर्धचमसम् अञ्जलेः चतुर्थांशजले पातय अर्धचमसमितं मधु च तत्र मिश्रय। इदम् औषधं पुत्राय देहि। ज्वरः प्रशमिष्यति।'

गोपाली गृहं गत्वा गोपालम् अकथयत् गोक्षुरम् आनय इति । मूढबुद्धिः स गोशालां गत्वा गोः क्षुरं कर्तित्वा आनयत् । औषधं दत्तम् । प्रकुपितः ज्वरः प्रावर्धत । पुत्र मूर्च्छितः अभवत् । व्याकुला गोपाली पुनः आचार्यस्य गृहं प्रति अधावत्। चकितः आचार्यः तर्कवितर्कान् कुर्वाणः गोपालगृहं प्राप्य, ताम्यन्तीं गां च दृष्ट्वा शङ्कया अपृच्छत् – 'किम् औषधं दत्तं त्वया?' गोपाली शुण्ठी गोः क्षुरं च अदर्शयत्।

तद् दृष्ट्वा शोकहतस्य आचार्यस्य मुखात् इमे श्लोकचरणाः निर्गताः –

**शुण्ठीगोक्षुरयोर्विचार्य मनसा कल्काशनं यन्मया दिष्टं तद्विपरीतमेव विहितं दत्तो यतो गोक्षुरः ।**
**नार्थो मूर्खजनालये न च सुखं नो वा यशो लभ्यते सद्वैद्यस्य तु मेऽभवद् महदहो गोहत्यया पातकम् ॥**

अतः औषधसेवनम् अविवेकितया न कर्तव्यम्।

### रुधिरस्य भ्रमणलीला

अपि तां घटनां सुष्ठु अवलोकयितुं शक्नोति। तदनन्तरं मस्तिष्कम् अपि शीघ्रं निर्णयं कारयितुं प्रवर्तते।

तथैव जीवने कापि दुर्घटना भवति तदा मनुष्यः शोकसन्तप्तः भवति। सः जीवितुं न उत्सहते। अस्मिन् अवसरे रुधिरस्य उचितं भ्रमणम् एव मनुष्यम् आत्मचिन्तनं प्रति प्रेरयति । समासेन वक्तुं शक्यते यत् शरीरस्य मनसः वा सर्वासु चेष्टासु रुधिरं जीवनरसः भूत्वा भ्रमणं करोति। रुधिरस्य गतिः जीवनम् अस्ति, तस्य अगतिः मरणम् उच्यते।

समाजे प्रतिष्ठा, चारित्र्यम्, अनुशासनम् इत्यादीनां शब्दानां विकासेन सह हृदयस्य विविधेषु भावेषु नियन्त्रणम् अपि अवर्धत। तस्मात् कारणात् रोदनावसरे अपि मनुष्यः रोदितुं न शक्नोति। सन्निहिते कोपे अपि न कुप्यति। कामः आर्द्रयति, किन्तु बाह्या भद्रता तम् आजीवनं शोषयति। एवम् अप्राकृता जीवनशैली मनोरोगान् जनयति।

प्रत्येकं मनुष्यः भावजगति जीवति। तस्य मरणे अपि भावस्य प्राधान्यं भवति। अतः एव जीवने भावस्य रक्षणं प्रतिक्षणं भवेत् चेत् रुधिरं वयं वक्तुं शक्नुयाम– शिवास्ते पन्थानः सन्तु!

## वैश्विकपर्यावरणादिसमस्यानां परिहाराय वैदिकयज्ञपरम्परायाः आवश्यकता

भाविन पाठकः

( अनुवर्तते... )

**विज्ञानदृष्ट्या यज्ञस्य प्रभावः**

– 'डायरेक्टर ओफ इन्विरामेन्टल एन्ड टेक्निकल कन्सल्टेन्ट्स' डॉ. मनोजगर्गेण स्वाध्ययने यज्ञद्वारा वायौ जले च आगतं परिवर्तनं प्रस्तुतम्।

– अमेरिकादेशे न्युजर्सीराज्ये 'अग्निहोत्र' इति एका संस्था अस्ति। एषा संस्था स्वदेशे प्रदूषणनिवारणाय अग्निहोत्रस्य बृहत्फलके प्रचारं प्रसारञ्च कुर्वत्यस्ति। आधुनिकविज्ञानेन यज्ञमहत्त्वं सम्यक् प्रतिपादितमस्ति।

– ऋग्वेदाथर्ववेदयोः नदीतडागादिषु जलस्य शुद्धिकरणाय यज्ञस्य आवश्यकता वर्णिता अस्ति।

– पर्यावरणप्रदूषणेन केवलं शारीरिकहानिः न परन्तु मानसिकप्रदूषणमपि भवति। परिणामतः प्रज्ञापराधः मानसिक-निर्बलता, कुविचाराः, दुर्व्यसनप्रवृत्तयः आत्मघातः इत्यादीनां प्रभावः वर्धते। यज्ञकरणेन मनः शिवसङ्कल्पयुक्तः भवति। अपि च सद्भावः शान्तिः परोपकारः इत्यादय सद्गुणाः वर्धन्ते।

– प्रसिद्धरसायणशास्त्रिणः डॉ. स्वामि-सत्य-प्रकाशस्य संशोधनानुसारं अग्निहोत्रप्रयोगद्वारा 'फार्मेल्डीहाइड' नाम्नः वायुः उत्पन्नः भवति। वायुः अयं परिवर्तनं विनैव वायुमण्डले प्रसारितः भवति। 'फार्मेल्डीहाइड' एकं शक्तिशालि कीटाणुनाशकं तत्त्वमस्ति। एतस्य प्रभावः तत्रैव भवति यदा तस्य जलबाष्पेण सह योगः भवति। अत एव यज्ञकर्मानुसारं यज्ञकुडं परितः जलसेचनं भवति।

– फ्रांसदेशस्य वैज्ञानिकस्य ट्रिलबर्ट् इत्यस्य संशोधनानुसारं यज्ञसामग्रयां शर्करादीनां मिष्टपदार्थानां प्रयोगः भवति। एतेषु पदार्थेषु वायुशुद्धिकरणस्य असाधारणी शक्तिः विद्यते। एतस्य धूमेन क्षयादिरोगाणां कीटाणवः नष्टाः भवन्ति।

– फ्रांसदेशस्य वैज्ञानिकस्य हैफकिन इत्यस्य संशोधनानुसारं गोधृतस्य ज्वलनेन रोगाणूनां नाशः भवति।

– फ्रांसदेशस्थवैज्ञानिकेन डॉ. डेमोसीवर्येण 'हिन्दु मैसेज' इति संशोधनग्रन्थे यज्ञद्वारा क्षयरोगस्य निवारणस्य प्रक्रिया वर्णिता अस्ति। चेन्नईस्थस्य डॉ. कर्नल किंगवर्यस्य कथनानुसारं गोघृत-तण्डुलाभ्यां सह केसरस्य प्रयोगेण विषाक्ताः रोगाणवः नष्टाः भवन्ति।

– यज्ञः प्रकृतेः सन्तुलनं दृढीकरोति। एतेन स्वच्छप्राणवायुः लभ्यते अपि च वातावरणे प्रदूषणमात्रां न्यूनीभवति।

– यज्ञप्रयोगावसरे मन्त्राणां सस्वरः पाठः भवति। एतेन ध्वनिप्रदूषणस्य समस्यायाः परिहारः भवति। सस्वरमन्त्रपाठेन उत्पन्नध्वनितरङ्गाः ध्वनिप्रदूषणं महताप्रमाणेन नष्टं कुर्वन्ति।

– विविधैः वैज्ञानिकसंशोधनैः प्रस्थापितं यत् अग्निहोत्रप्रयोगेण कतिपयवायूनां उत्सर्जनं भवति तेन वातावरणं शुद्धं भवति। प्रदूषणं च दूरीभवति। जर्मनसंशोधनकर्तुः मतानुसारेण भारते अग्निहोत्रं नामकं महत् शस्त्रं विद्यते यस्य उपयोगः प्रदूषणनिवारणाय भवितुमर्हति।

परिणामः स्वयमेव उद्घोषयति यत् यज्ञद्वारा प्राणघातकरोगाः अपि अपगच्छन्ति। वर्तमानप्रयोगैः सिद्ध्यते यत् प्राचीनतपोवनसंस्कृतौ वर्णितायाः यज्ञपरम्पराया महत्त्वं सर्वदा विद्यते एव। यज्ञपरम्परा न केवलं धार्मिकं कृत्यं अपि तु सम्पूर्णवैज्ञानिकी प्रक्रिया अस्ति। यज्ञपरम्पराह्रासेन पर्यावरणं सङ्कटापन्नं जातमस्ति।

अत एव अस्याः प्राचीनायाः वैज्ञानिक्याः यज्ञपरम्पारायाः पुनः प्रयोगः करणीयः भवति येन पर्यावरणीयतत्त्वानि प्रदूषणमुक्तानि भवेयुः सृष्टिचक्रं च सम्यक् प्रचलेत्।

# मासवार्ता

## सम्पन्नं व्याकरणशिबिरम्

एकलव्य-संस्कृत-एकेडेमी दिपावल्याः अवकाशकाले प्रतिवर्षं व्याकरणशिबिरम् आयोजयति। शिबिरेऽस्मिन् नवमकक्ष्यायाः दशमकक्ष्यायाः च छात्राः संस्कृतं पठन्ति। छात्राः संस्कृतभाषायाः योग्यं मार्गदर्शनं प्राप्य संस्कृतभाषां सम्यक् जानीयुः इति अस्य व्याकरणशिबिरस्य आशयः वर्तते। 'देवदत्तः पयसा ओदनं भुङ्क्ते' इति स्मृत्वा एकलव्य-संस्कृत-एकेडेमीसंस्थानेन तादृशः अभ्यासक्रमः रचितः वर्तते यस्मिन् भागं गृहीत्वा गुणाङ्कान् इच्छन्तः छात्राः सुन्दरं संस्कृतमपि पठन्ति। अभ्यासक्रमोऽयं सफलः। ओक्टोबरमासस्य ३० दिनाङ्कात् नवेम्बरमासस्य ८ दिनाङ्कं यावत् संस्थाने व्याकरणशिबिरं प्राचलत्। शिबिरेऽस्मिन् छात्राः संस्कृतव्याकरणस्य अध्ययनम् अकुर्वन्।

**॥ सार्धशताब्दीवर्षे ॥**

हे गांधी ! हे मोहन !
सुज्ञ महात्मन् ! हे मोहन...
भारत-राष्ट्रपिता मोहन !
सत्यार्थं जागृतमोहन !...

त्वया सूचिते कार्ये मग्नाः
साधयामहे तत्संलग्नाः;
सत्त्वतत्त्वशोधक मोहन !
सुज्ञमहात्मन ! हे मोहन !...

स्मरन् स्मरन् त्वद्गरिमां दिव्याम्
संस्मरँश्च ते प्रतिभां भव्याम्;
मोदमयं चित्तं मोहन !
सुज्ञ महात्मन् हे मोहन !...

अधुना सार्धशताब्दीवर्षे,
प्रेरकोत्सवस्सत्यविमर्शे;
यच्छाशीर्वादान् मोहन !
सुज्ञ महात्मन् हे मोहन !...

**यथायोग्यम् !**

श्रद्धया प्रार्थनाऽस्माकम्
वाण्या मौनेन वा पुनः।
राष्ट्रस्य रक्षणार्थं च
विकासार्थं समन्ततः॥

प्रभो ! स्यात्कृपया शान्तिः
भावयित्वा परस्परम्।
सर्वत्र भ्रातृभावस्स्यात्
नश्येद् वैरं निरर्थकम्॥

आतङ्कीमानसं नश्येत्
शिवसङ्कल्पता भवेत्।
सद्गतानां चिरां शान्तिम्
करोतु परमेश्वर॥

प्रीत्या प्रीतिप्रदं स्यान्नः
वैरं वैरेण वर्धते।
इतीदं गांधी-वाक्येन
यथायोग्यं समाचर॥

**जिज्ञासा-ज्ञानस्य जननी**

वक्षाद् भूमौ पततिफलेहि,
कथमिति ? जाता जिज्ञासा।
तच्च गुरुत्वाकर्षणतस्तु,
ज्ञानजननीति जिज्ञासा॥

**वरे नारी-वर्षे मातृवन्दना**
**वन्द्यौ पितरौ**

श्रद्धास्वरूपिणी माता
पिता विश्वासरूपतः।
प्रत्यक्षदेवरूपौ तौ
वन्द्यौ नः पितरौ मुदा॥

याभ्यामस्तित्वमस्माकं
याभ्यां संस्कारसिञ्चनम्।
भद्रार्थं परिवारस्य
प्रणम्यौ पितरौ सदा॥

ये सदा हितकर्तारौ
सदा सद्भावभावितौ।
सहर्षं हृदये स्थाप्यौ
सेव्यौ सेवे परात्परौ॥

**- डॉ. वासुदेवः वि. पाठकः 'वागर्थः'**

## कृपया हसन्तु

डॉ. कमलेशकुमारः चोकसी

शिक्षकः - एतादृशं किं वस्तु वर्तते यत्र शतशः जीवाः समाविष्टाः भवन्ति ।

छात्रः - भवतां शिरस्त्राणम् । तत्र प्रायः शतशः मत्कुणाः समाविष्टाः सन्तः उषितुं शक्नुवन्ति ।

★ ★ ★ ★ ★

शिक्षकः - वद रमेशः, हिटलरेण अद्य यावत् कति देशाः जिताः सन्ति ।

छात्रः - द्वादश ।

शिक्षकः - तेषां परिगणनं कुरु ।

छात्रः - एकः । द्वौ । त्रयः । चत्वारः । पञ्च । षड् । सप्त । अष्टौ । नव । दश । एकादश । अथ च द्वादश इति ।

★ ★ ★ ★ ★

शिक्षकः - बालाः, सर्वैः सदा प्रातरुत्थाय स्नानादिकं विधाय ईशस्मरणं कर्तव्यम् । एषः अस्माकमाचारः वर्तते ।

छात्रः - गुरुवर्याः भवन्तः गतदिने प्रातः अष्टवादनवेलायां विना स्नानं चायपानं कुर्वन्तः आसन् ।

शिक्षकः - उपविश मूर्ख ! केन प्रबोधितः त्वम् ? यादृशम् अहं कथयामि तादृशं त्वमाचर इति । केन गर्दभेन त्वं प्रबोधितः यत् अहं करोमि तत् त्वया कार्यमिति ?

छात्रः - भवद्भिरेव वयं बोधिताः यत् स्वस्मात् ये ज्येष्ठाः अनुभविनः सन्ति, तेषां मानवानाम् अनुकरणं करणीयमिति ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**मौनं कालविलम्बश्च प्रयाणं भूमिदर्शनम् ।**
**भ्रुकुटिश्चान्यवार्ता च नकारः षड्विधः स्मृतः ॥**

कश्चित् धनं साहाय्यं वा यदा याचते परिश्रमकार्यं सदा सूच्यते, असम्मतं किमपि वा यदा उच्यते तदा निराकृतिः दर्शनीया भवति । प्रत्यक्षतया निराकृतिदर्शनं कदाचित् अप्रियतायै अगौरवाय च भवति । एतादृशेषु प्रसङ्गेषु निषेधप्रदर्शनाय अत्र सन्ति षड् उपायाः । मौनस्य अवलम्बनं, 'श्वः पश्याम' इति कथनं, ततः उत्थाय गमनं, मुखम् अधः कृत्वा उपवेशनं, भ्रुवोः वक्रतासम्पादनम्, अन्यस्य विषयस्य उपस्थापनम् इत्येते एव षड् उपायाः ।

**लिप्समानेषु वैद्येषु चिरादासाद्य रोगिणम् ।**
**दायादाः सम्प्ररोहन्ति दैवज्ञा मान्त्रिका अपि ॥**

चिरकालानन्तरं रोगी यदि प्राप्येत तर्हि वैद्याः ततः प्रभूतं धनं स्वीकर्तुम् उपायान् चिन्तयन्ति । व्याधिग्रस्ततां वदन्तः महाव्ययसाध्यां चिकित्सां वदन्ति ते । एतस्य दर्शनात् असूयावन्तः दायादाः सन्तुष्टाः भवन्ति सहजतया एव । दैवज्ञमान्त्रिकादयः अपि सन्तुष्टाः भवन्ति – इतः परम् अयम् अचिरात् एव अस्मत्समीपम् आगच्छन् अस्मदीयायाः आयवृद्धेः कारणं भविष्यति इति ।

## ज्ञानसरिता

**सुपिष्टकेतिहासः** – मानवः सुपिष्टकं सेवते केनचित् प्रकारेण आ प्राचीनकालात् अपि । किम् एतत् वचनं भवत्सु आश्चर्यं जनयति ? ऐदम्प्राथम्येन सुपिष्टकं निर्मितं निष्पिष्टेन सीरीयल्धान्येन । धान्यपिष्टं चलेन मिश्रीकृत्य तत् अग्निना उष्णीकृत्य सुपिष्टकं निर्मान्ति स्म पूर्वजाः ।

एषु दिनेषु तु 'यीस्ट्' नामकं किञ्चन द्रव्यं योजयित्वा सुपिष्टकं निर्मीयते । एतत् यीस्ट् तु सस्यजन्यात् शिलीन्ध्रतः प्राप्यते । एतादृशस्य सुपिष्टकस्य निर्माणस्य क्रमम् ऐदम्प्राथम्येन अनुसृतवन्तः आसन् इजिप्शियन्जनाः । तेभ्यः ग्रीक्जनाः एतं निर्माणक्रमम् अधिगतवन्तः । क्रि.पू. १५० तमे वर्षे ऐदम्प्राथम्येन सुपिष्टकनिर्माणापणः आरब्धः । किन्तु क्रि.पू. ४००० वर्षेभ्यः पूर्वं निर्मितेषु ईजिप्टीयेषु शङ्कुभवनेषु (पिरामिड्) सुपिष्टकं प्राप्तम् अस्ति । ताहितिनामके प्रदेशे 'ब्रेड्फलम्' प्राप्यते, यच्च गन्धेन रुच्या च सुपिष्टकसदृशम् एव अस्ति ।

**ह्याम्-आकाशवाणी** – यद्यपि विज्ञानक्षेत्रे अस्माभिः महती प्रगतिः साधिता अस्ति, तथापि नैसर्गिकविकोपकाले वयं सम्पर्कसाधनानां निष्क्रियतायाः कारणतः असहायकताम् अनुभवामः । झञ्झावातादिषु प्रसङ्गेषु सम्पर्कसाधनानां निष्क्रियतायां जातायां किं वा कर्तुं शक्येत ? अत्र सरलः परिहारः नाम 'ह्याम्' । ह्याम्-आकाशवाणी जगति स्थितानां ह्याम्वतां सर्वेषां सम्पर्कं साधयितुम् अर्हति क्षणमात्रेण ।

ह्याम्-आकाशवाणी स्वतन्त्रकेन्द्रायते । तरङ्गप्रसारः तरङ्गग्रहणं चापि इतः सम्भवति । अतः गृहे एव आकाशवाणीकेन्द्रं स्थितम् एव भवति । यदि सकृत् ह्याम्यन्त्रं क्रियाशीलं सिद्धं भवति तर्हि तरङ्गाधारेण सन्देशप्रसारः शक्यः भवति । तदवसरे ये ह्याम्सम्पर्कयुक्ताः भवन्ति ते सन्देशं प्राप्तुम् अर्हन्ति । अतः दूरस्थैः सह जल्पनाय एतत् साधनं नितराम् उपकारकम् । सङ्गणकात् अपि एतत् एव अधिकलाभकरम् ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सन्निवृत्तिः** | लौटना | returning |
| **सन्निवेशः** | इकट्ठा होना | collection |
| **सन्निहितः** | उपस्थित | present |
| **सन्न्यसनम्** | छोड़ना | resignation |
| **सपदि** | शीघ्र | immediately |
| **सपर्या** | पूजा | worship |
| **समज्या** | सभा | an assembly |
| **समज्ञा** | यश | fame |
| **समरः** | संग्राम | battle |
| **समर्थनम्** | पुष्टि करना | supporting |
| **समाख्या** | यश | fame |
| **समापन्नः** | प्राप्त | obtained |
| **समायोगः** | मेल | union |
| **समाराधनम्** | प्रसन्न करना | pleasing |
| **समारोपणम्** | स्थित करना | placing in |

## किं भवन्तः जानन्ति ?

**१ ) 'मुद्राराक्षसः' नाट्यग्रन्थस्य कर्ता कः वर्तते ?**

(क) विशाखदत्तः (ख) श्रीहर्षः (ग) कालिदासः (घ) अश्वघोषः

**२ ) महावीरचरितस्य कर्ता कः वर्तते ?**

(क) कालिदासः (ख) भवभूतिः (ग) भासः (घ) भारविः

**३ ) अधस्तनग्रन्थेषु कः ग्रन्थः जयदेवेन विरचितः वर्तते ?**

(क) रत्नावली (ख) कर्पूरमञ्जरी (ग) प्रसन्नराघवः (क) कुन्दमाला

**४ ) अष्टाङ्गसङ्ग्रहः अष्टाङ्गहृदयम् मध्यमसंहिता रसरत्नसमुच्चयः इत्येते आयुर्वैदिकचिकित्साग्रन्थाः केन रचिताः सन्ति ?**

(क) भावप्रकाशेन (ख) चरकेण (ग) सुश्रुतेन (घ) वाग्भट्टेन

**५ ) 'भावप्रकाशनिघण्टुः' नाम्नः आयुर्वैदिकः चिकित्साग्रन्थः केन रचितः वर्तते ?**

(क) चरकेण (ख) वाग्भट्टेन (ग) भावमिश्रेण (घ) सुश्रुतेन

**६ ) 'स्वप्नवासवदत्तम्' नाटकस्य रचयिता कः वर्तते ?**

(क) भासः (ख) कालिदासः (ग) भवभूतिः (घ) जयदेवः

उत्तराणि – (१) क (२) ख (३) ग (४) घ (५) ग (६) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

## मार्गदर्शनम्
## ( व्याकरणम् )
## Class 10

**Date :** 16/1/20 to 27/1/20
**Day :** Daily
**Time :** 8:00 am to 9:30 am
**Fees :** 2000/-

- **Venue :** Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

## Admission Open

**Do you want to learn Sanskrit ?**
**Here is a chance......**

**Participate in**
## Sanskrit Spoken
**Programme and learn Sanskrit**

**Date :** 11/11/19 to 12/02/20
**Day :** Mon-Wed-Fri
**Time :** 6.30pm to 8.00pm
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
### साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006